दर्शयतीति तस्य तथात्वम् ५दर्शयितरि च। "कर्णधार इवापारे भगवान् पारदर्शकः" भाग० १।११।२८। तुमर्थे ण्वुल्। ६द्रष्टुमित्यर्थे। "अनिमन्त्रितो न गच्छेत यज्ञं गच्छेत दर्शकः" भा० अनु० १०४ अ०। दर्शकः द्रष्टुमित्यर्थः एतद्योगेन कर्मणि न षष्ठीत्यतः यज्ञमित्यत्र द्वितीया।

**दर्शत** पु० दृश्यतेऽसौ दिवि दृश-कर्मणि अतच्। १सूर्य्ये २चन्द्रे च सि० कौ०। ३दर्शनीये त्रि०। "स दर्शतश्रीरतिथिर्गृहे गृहे" ऋ०१०।९१।२। "दर्शतश्रीः दर्शनीयविभूतिः" भा०।

**दर्शन** न० दृश-भावकरणादौ ल्युट्। १नेत्रे २स्वप्ने ३बुद्धौ ४धर्मे ५दर्पणे ६शास्त्रे मेदिनि०७इज्यायाम् अजयपा० ८वर्णे त्रिकाण्ड०९निभालने जटाध०। दृश्यते यथार्थतया ज्ञायते पदार्थोऽनेन करणे ल्युट्। अध्यात्मावेदके १०शास्त्रभेदे तानि च नास्तिकबौद्धजैनवैष्णवास्तिकादिमतभेदेन नानाविधानि। तानि च सर्वदर्शनसंग्रहे तत्तन्मतप्रदर्शनावसरे दर्शितानि। तत्रास्तिकदर्शनानि षट् तत्र गौतमेन न्यायदर्शनं, कणादेन वैशेषिकं, कपिलेन साङ्ख्यं, पतञ्जलिना योगदर्शनं, जैमिनिना पूर्वमीमांसाख्यासेन वेदान्तदर्शनम् प्रणीतम्। तच्च वेदान्तदर्शनं व्यासप्रणीतमेकमपि बहुभिर्विद्वद्भिः द्वैताद्वैतविशिष्टाद्वैतशुद्धाद्वैतप्रभेदेन नानाविधं यथा बुद्धस्यैकस्योपदेशकत्वेऽपि विनेयानां बुद्धिवैचित्र्यात् स्वस्वबुद्ध्यनुसारिपदार्थकल्पनया योगाचारमाध्यमिकादिभेदा उपजाताः। एवं वेदान्तस्यापि "षड्दर्शनानि मेऽङ्गानि पादौ कुक्षिः करौ शिरः। तेषु भेदन्तु यः कुर्यान्मदङ्गच्छेदको हि सः। एतान्येव कुलस्यापि षडङ्गानि भवन्ति हि। तस्मान्मदात्मकं कौलमहं कौलात्मकः प्रिये!" तन्त्रशास्त्रम्। पदार्थभेददर्शने फलभेदो यथा "नन्द उवाच। "येषाञ्च दर्शने! पुण्यं पापञ्च यस्य दर्शने। तत्सर्वं वद सर्वेश! श्रोतुं कौतूहलं हि मे। श्रीभगवानुवाच। सुब्राह्मणानां तीर्थानां वैष्णवानाञ्च दर्शने। देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः। सूर्य्यस्य दर्शने भक्त्या सतीनां दर्शने तथा। सन्न्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम्। भक्त्या गवाञ्च वह्नीनां गुरूणाञ्च विशेषतः। गजेन्द्राणाञ्च सिंहानां श्वेताश्वानां तथैव च। शुकानाञ्च पिकानाञ्च खञ्जनानां तथैव च। हंसानाञ्च मयूराणां चाषानां शङ्खपक्षिणाम्। वत्सप्रयुक्तधेनूनामश्वत्थानां तथैव च। पतिपुत्रवतीनाञ्च नराणां तीर्थयायिनाम्। प्रदीपानां सुवर्णानां मणीनाञ्च विशेषतः। मुक्तानां हीरकाणाञ्च माणिक्यानां महाशय!। तुलसीशुक्लपुष्पाणां दर्शनं पापनाशनम्। फलानि शुक्लधान्यानि घृतं दधि मधूनि च। पूर्णकुम्भञ्च लाजांश्च राजेन्द्रं दर्पणं जलम्। मालाञ्च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः। गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम्। पुष्पोद्यानं पुष्पितञ्च दृष्ट्वा पुण्यं लभेन्नरः। देवाश्रितं देवघटं सुगन्धिपवनं तथा। शङ्खञ्च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः। शुक्लपक्षस्य चन्द्रस्य पीयूषं चन्दनं तथा। कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द! पुण्यं लभेन्नरः। पताकामक्षयवटं देवोत्थितं शुभम्। देवालयं देवखातं दृष्ट्वा पुण्यं लभेन्नरः। शुक्तिं प्रवालं रजतं स्फाटिकं कुशमूलकम्। गङ्गाम्रदं कुशं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः। पुराणपुस्तकं शुद्धं सवीजं विष्णुयन्त्रकम्। स्निग्धदूर्वाक्षतं रत्नं दृष्ट्वा पुण्यं लभेन्नरः। तपस्विनं सिद्धमन्त्रं समुद्रं कृष्णसारकम्। यज्ञं महोत्सवं दृष्ट्वा सुपुण्यं लभते नरः। गोमूत्रं गोमयं दुग्धं गोधूलिं गोष्ठगोष्पदम्। पक्वशस्यान्वितं क्षेत्रं दृष्ट्वा पुण्यं लभेन्नरः। रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम्। सुवेशिकां सुवसनां दिव्यभूषणभूषिताम्। वेश्यां क्षेमङ्करीं गन्धं सदूर्वाक्षततण्डुलम्। सिद्धान्नं परमान्नञ्च दृष्ट्वा पुण्यं लभेद्ध्रुवम्। कार्त्तिक्यां पूर्णिमायाञ्च राधिकाप्रतिमां शुभाम्। संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम्। हिन्दुलायां तथाष्टम्यामिषे मासि सिते शुभे। श्रीदुर्गाप्रतिमां दृष्ट्वा करोति जन्मखण्डनम्। शिवरात्रौ च काश्याञ्च विश्वनाथस्य दर्शनम्। कृत्वोपवासं पूजाञ्च करोति जन्मखण्डनम्। जन्माष्टमीदिने भक्तो दृष्ट्वा मां विन्ध्यमाधवम्। प्रणम्य पूजां कृत्वा च करोति जन्मखण्डनम्। उपोष्य व्रजभूमौ च भाण्डीरे मालतीवने। संपूज्य राधां मां चैव करोति जन्मखण्डनम्। पौषे मासि शुक्लरात्रौ यत्र तत्र स्थले नरः। पद्मायाः प्रतिमां दृष्ट्वा करोति जन्मखण्डनम्। सप्तजन्म भवेत्तस्य पुत्रः पौत्रो धनेश्वरः। उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने। दृष्ट्वा काश्यामन्नपूर्णां करोति जन्मखण्डनम्। दत्त्वा विष्णुपदे पिण्डं विष्णुं यश्च विलोकयेत्। पितॄणां स्वात्मनश्चैव करोति जन्मखण्डनम्। प्रयागे मुण्डनं कृत्वा यश्च पितॄन् प्रतर्पयेत्। उपोष्य नैमिषारण्ये करोति जन्मखण्डनम्। उपोष्य